http://www.ukboardonline.com

028

228 (HSF)

# 2020

# संस्कृतम्

## (केवल प्रश्नपत्रम्)

अवधि : होरात्रयम् ] [ पूर्णांक : 100

निर्देश : (i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(ii) उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।

(iii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण एकस्मिन् स्थाने लेखनीयानि।

(iv) प्रश्नपत्रे उत्तराणि न लेखनीयानि।

(v) प्रश्न संख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(vi) खण्डसंख्या अपि लेखनीया।

### खण्ड - 'क' (अपठितांश-अवबोधनम्)

1. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत-

बौद्ध धर्मस्य प्रवर्तकः गौतमः एकः क्षत्रियकुमारः आसीत्। सः बाल्यकालादेव वीतरागः आसीत्। ईदृशं पुत्रम् अवलोक्य पितुर्मनसि महती चिन्ता अभवत्। पुत्रस्य मनसि भोगेच्छाम् उत्पादनाय पिता प्रयत्नम् अकरोत् किन्तु गौतमः एकस्मिन् दिने रात्रौ गृहत्यागम् अकरोत्। तस्य चेतसि कामविकारस्य लेशोऽपि न अभवत्। सः दुष्करं तपः कृत्वा परां सिद्धिं प्राप्तवान्।

(क) एक पदेन उत्तरत – 1×2=2

(i) गौतमः कः आसीत्?

(ii) गौतमः एकस्मिन् दिने रात्रौ किम् अकरोत्?

(ख) पूर्णवाक्येन उत्तरत– 1

(i) गौतमः बाल्यकालादेव कीदृशः आसीत्?

(ग) निर्देशानुसारम् उत्तरत- 1×2=2

(i) 'भोगेच्छाम्' इति पदे सन्धिविच्छेदम् कुरुत।

(ii) 'प्राप्तवान्' इति क्रियापदस्य कर्तृपदं लिखत।



http://www.ukboardonline.com

http://www.ukboardonline.com

http://www.ukboardonline.com

http://www.ukboardonline.com

2. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत–

श्री जवाहरलालः महापुरुषः आसीत्। सः देशभक्तः नायकश्च आसीत्। सः उच्चशिक्षायै आंग्लदेशम् अगच्छत्। तत्र सः विधिशास्त्रम् अपठत्। अनन्तरं सः स्वदेशम् आगत्य देशस्य सेवायां संलग्नः अभवत्। सः गान्धिमहोदयेन चालिते सत्याग्रहे सम्मिलितः अभवत्। भारतस्य ग्रामे-ग्रामे गत्वा देशस्य सर्वान् जनान् अबोधयत् येन जनाः देशस्य स्वतन्त्रतायै यत्नं कुर्वन्तु। ईदृशानां जनानां प्रेरणया एव जनाः स्वतन्त्रता प्राप्तये उद्यताः अभवन्। गान्धिमहोदयेन सह श्री जवाहरलालः अपि बहुवारं कारागारम् अगच्छत्। देशभक्तानां त्याग-बलिदानेन एव अस्माकं देशः स्वतन्त्रः अभवत्। श्री जवाहरलाल नेहरू महोदयः स्वतन्त्रभारतस्य प्रथमः प्रधानमन्त्री अभवत्। सः देशस्य सेवायाम् एव स्व प्राणान् अत्यजत्। नेहरू महोदयः अद्यापि यशः शरीरेण अस्माकं मध्ये अस्ति।

(क) एक पदेन उत्तरत - 1×2=2

(i) कः देशभक्तः नायकश्च आसीत्?

(ii) नेहरू महोदयः केन रूपेण अस्माकं मध्ये अस्ति?

(ख) पूर्णवाक्येन उत्तरत - 2×2=4

(i) श्री जवाहरलालः आंग्लदेशे किम् अपठत्?

(ii) केषां प्रेरणया एव जनाः स्वतन्त्रताप्राप्तये उद्यताः अभवन्?

(ग) यथानिर्देशम् उत्तरत - 1×2=2

(i) 'चालिते सत्याग्रहे' अत्र विशेष्य पदं किम्?

(ii) 'तत्र सः विधिशास्त्रम् अपठत्' अत्र 'सः' सर्वनाम पदं कस्य कृते प्रयुक्तम्?

(घ) अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत। 2

## खण्ड - 'ख' (रचनात्मकं लेखनम्)

3. आयुषः छात्रावासे वसति। शारदीय अवकाशे तस्य विद्यालये संस्कृत सम्भाषण शिविरं प्रचलिष्यति। अतएव सः गृहं न गमिष्यति इति सूचयन्तं पितरं प्रति लिखितं तस्य पत्रं मञ्जूषायाः सहायतया पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत - 1×5=5

अशोक छात्रावासः

(i).........

तिथि : 22-08-2019



http://www.ukboardonline.com

http://www.ukboardonline.com

परमपूज्य पितृमहाभागाः,

(ii) ..........।

अत्र अहं कुशली। तत्रापि भवन्तः सर्वे (iii)..........इति मन्ये। अत्र मम (iv)......... सम्यक् प्रचलति। मम विद्यालये शारदीय अवकाशे (v) ........प्रचलिष्यति। अतः अहं अवकाशे गृहं न आगमिष्यामि। अन्यत् शुभम्।

भवदीयः पुत्रः

आयुषः

| मञ्जूषा - अध्ययनम्, देहरादूननगरम्, संस्कृत सम्भाषणशिविरम्, सादरमभिवादनम्, कुशलिनः। |
|---|

4. मञ्जूषातः शब्दचयनं कृत्वा निम्नांकितं संवादं पूरयित्वा लिखत – 1×5=5

सुलक्षणा - सखि! ग्रीष्मावकाशे त्वं कुत्र .........

मनीषा - सखि! ग्रीष्मावकाशे अहम् ..........गमिष्यामि।

सुलक्षणा - जयपुरं तु ..........नगरम् अस्ति।

मनीषा - आम्! त्वमपि ..........सह चल।

सुलक्षणा - मह्यं भ्रमणं ...........। अवश्यं चलिष्यामि।

| मञ्जूषा - ऐतिहासिक, रोचते, गमिष्यसि, मया, जयपुरनगरं |
|---|

5. 'वृक्षाः - अस्माकं मित्राणि' इति विषयम् अधिकृत्य मञ्जूषातः शब्दान् चित्वा पञ्चवाक्यानि लिखत – 2×5=10

| मञ्जूषा - परोपकाराय, फलानि, छाया, पुष्पाणि, भूमेः संरक्षणम्, खगाः, नीडानि, काष्ठानि, सत्पुरुषा इव। |
|---|

### खण्ड - 'ग' (अनुप्रयुक्त व्याकरणम्)

6. अधोलिखितेषु रेखांकितपदेषु सन्धिं / सन्धि-विच्छेदं कृत्वा उत्तरपुस्तिकायां लिखत- 1×3=3

(क) महर्षिः तपः चरति।

(ख) एतत् + श्रुत्वा जनाः गृहम् अगच्छन्।

(ग) रामश्च लक्ष्मणश्च वनम् अगच्छताम्।

7. रेखांकित पदेषु समासं / समास विग्रहं कृत्वा लिखत– 1×4=4

(क) छात्राः क्रीडाक्षेत्रे कन्दुकेन क्रीडन्ति।

(ख) गुरुकुले छात्राः अष्टाध्यायीं स्मरन्ति।

(ग) सरोवरे रक्तानि कमलानि विकसन्ति।

(घ) शक्तिम् अनतिक्रम्य कार्यं कुरु।



http://www.ukboardonline.com
http://www.ukboardonline.com
http://www.ukboardonline.com

http://www.ukboardonline.com

1×5=5

8. रेखांकितपदेषु प्रकृति-प्रत्ययौ संयोज्य वाक्यानि उत्तरपुस्तिकायां लिखत-

(क) सा समाजस्य सेवक + टाप् अस्ति।

(ख) जगति विश्वबन्धु + तल् भवेत् ।

(ग) मया पुस्तकानाम् अध्ययनं कृ + अनीयर्।

(घ) गम् + शतृ छात्रः गुरुं नमति।

(ङ) गार्गी एका विद्वस् + ङीप् नारी आसीत्।

1×5=5

9. मञ्जूषायाः सहायतया निम्नलिखित वाक्यानि अव्ययशब्दैः पूरयित्वा लिखत-

(क) वसन्तकाले पवनः – – वहति।

(ख) – – – अस्माकं विद्यालये संस्कृत-प्रतियोगिता भविष्यति।

(ग) सज्जनानां चित्तम् कमलम् – – – कोमलं भवति।

(घ) – – कदापि कार्याणि न कुर्यात्। http://www.ukboardonline.com

(ङ) कर्मणि – – – अधिकारः ते।

मञ्जूषा - इव, एव, शनैः-शनैः, सहसा, श्वः


10. अधोलिखित वाक्यानां वाच्यपरिवर्तनं कृत्वा उत्तरपुस्तिकायां लिखत – 1×3=3

(क) त्वया कुत्र गम्यते?

(ख) छात्रः अध्ययनं करोति।

(ग) भिक्षुकेन भिक्षा याच्यते।

11. विद्यालये वार्षिकोत्सवस्य समयसारिणी प्रसारिता। घटिकां दृष्ट्वा संस्कृतपदेषु समयं लिखत यत् वार्षिकोत्सवे कदा किं भविष्यति - 1×4=4



(क) प्रातः 10:00 बजे (ख) प्रातः 10:30 बजे (ग) प्रातः 10:45 बजे (घ) अपराह्न 4:15 बजे

(क) प्रातः ..........मुख्यातिथेः आगमनम् ।

(ख) प्रातः ......... मुख्यातिथेः स्वागतम् ।

(ग) प्रातः .......... प्रधानाचार्येण विवरणपाठः, सांस्कृतिक कार्यक्रमाश्च।

(घ) अपराह्णे..........छात्रैः राष्ट्रगानम्, समापनं च।



http://www.ukboardonline.com
http://www.ukboardonline.com
http://www.ukboardonline.com

http://www.ukboardonline.com

12. अधोलिखित वाक्ययोः अङ्कानां स्थाने संख्यावाचक विशेषणैः रिक्तस्थान पूर्तिं तत्कृत्वा लिखत- 1×2=2

(क) पुराणानां संख्या (18) ..........सन्ति।

(ख) ग्रामस्य प्राथमिक पाठशालायां (97).........छात्राः सन्ति।

13. अधोलिखितेषु वाक्येषु रेखांकितानि पदानि शुद्धानि कृत्वा पूर्णवाक्यम् उत्तरपुस्तिकायां लिखत- 1×4=4

(क) मम कक्षायाः <u>अयं</u> बालिका गीतं गायति।

(ख) ते भ्रमणाय उद्यानं <u>गच्छति</u> ।

(ग) अहं ह्यः दिल्लीनगरं <u>गमिष्यामि</u>।

(घ) मार्गे <u>एकः</u> नदी वहति।

**खण्ड - 'घ' (पठित-अवबोधनम्)**

14. अधोलिखितं गद्यांशं पठित्वा तत् आधारितान् प्रश्नान् उत्तरत-

"बहून्यपत्यानि मे सन्तीति सत्यम्। तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनुभवामि। यतो हि अयमन्येभ्यो दुर्बलः। सर्वेष्वपत्येषु जननी तुल्यवत्सला एव। तथापि दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव इति सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्। स च तामेवमसान्त्वयत् - गच्छ वत्से! सर्वं भद्रं जायेत"।

(क) एक पदेन उत्तरत- 1

(i) केषु जननी तुल्यवत्सला?

(ख) पूर्ण वाक्येन उत्तरत- 1×2=2

(i) सुरभिवचनं श्रुत्वा कस्य हृदयमद्रवत्?

(ii) मातुः अभ्यधिका कृपा कस्मिन् भवति।

(ग) यथानिर्देशम् उत्तरत- 1×2=2

(i) 'सन्तीति' इत्यस्मिन् पदे सन्धिविच्छेदं कुरुत।

(ii) 'श्रुत्वा' इत्यस्मिन् पदे प्रकृति-प्रत्यय विभाजनं कुरुत।

15. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत-

आश्वास्य पर्वतकुलं तपनोष्णतप्त,
मुद्दामदावविधुराणि च काननानि।
नाना नदी नदशतानि च पूरयित्वा,
रिक्तोऽसि यज्जलद! सैव तवोत्तमा श्रीः।।



http://www.ukboardonline.com

http://www.ukboardonline.com

http://www.ukboardonline.com

http://www.ukboardonline.com

(क) एक पदेन उत्तरत- 1

(I) पर्वतकुलं कीदृशम् अस्ति?

(ख) पूर्ण वाक्येन उत्तरत- 1×2=2

(I) उद्दामदाववियुराणि कानि सन्ति?

(II) कस्य उत्तमा श्रीः अस्ति?

(ग) निर्देशानुसारम् उत्तरत- 1×2=2

(I) 'रिक्तोऽसि यज्जलद' अत्र क्रियापदं किम् ?

(II) 'पर्वतकुलं तपनोष्णतप्तम्' अत्र विशेष्यपदं किम् ?

16. अधोलिखितं नाट्यांशं पठित्वा तदाधारितप्रश्नान् उत्तरत-

चन्दनदासः - एवं नु इदम्। तस्मिन् समये आसीदस्मद्गृहे अमात्यराक्षस्य गृहजन इति।

चाणक्यः - पूर्वम् 'अनृतम्', इदानीम् "आसीत्" इति परस्परविरुद्धे वचने।

चन्दनदासः - आर्य! तस्मिन् समये आसीदस्मद्गृहे अमात्यराक्षसस्य गृहजन इति।

चाणक्यः - अथेदानीं क्व गतः?

चन्दनदासः - न जानामि।

चाणक्यः - कथं न ज्ञायते नाम? भो श्रेष्ठिन्! शिरसि भयम् अतिदूरम् तत्प्रतिकारः।

चन्दनदासः - आर्य! किं मे भयं दर्शयसि? सन्तमपि गेहे अमात्यराक्षसस्य गृहजनं न समर्पयामि, किं पुनरसन्तम् ?

चाणक्यः - चन्दनदास! एष एव ते निश्चयः।

चन्दनदासः - बाढम्, एष एव मे निश्चयः।

चाणक्यः - (स्वगतम्) साधु ! चन्दनदास साधु।
सुलभेष्वर्थलाभेषु परसंवेदने जने।
क इदं दुष्करं कुर्यादिदानीं शिविना विना।।

(क) एक पदेन उत्तरत- 1

(I) तस्मिन् समये कस्य गृहे अमात्यराक्षसस्य गृहजनः आसीत् ?

(ख) पूर्ण वाक्येन उत्तरत– 1×2=2

(I) चन्दनदासः सन्तमपि गेहे कं न समर्पयितुम् इच्छति?

(II) केन विना इदं दुष्करं कुर्यात्?

(ग) निर्देशानुसारम् उत्तरत - 1×2=2

(I) 'परस्परविरुद्धे वचने' अत्र विशेषणपदं किम्?

(II) 'एष एव मे निश्चयः' अत्र 'मे' इति सर्वनाम पदं कस्मै प्रयुक्तम् ?



http://www.ukboardonline.com

http://www.ukboardonline.com
http://www.ukboardonline.com

http://www.ukboardonline.com

17. अधोलिखितयोः श्लोकयोः भावार्थम् उपयुक्तपदैः पूरयित्वा उत्तरपुस्तिकायां लिखत -

(क) सम्पत्तौ च विपत्तौ च महतामेकरूपता।

उदये सविता रक्तो रक्तश्चास्तमये तथा।। 1×3=3

भावार्थः – महापुरुषाः.........एक रूपेण भवन्ति। यथा .........उदयसमये अस्तसमये च .........एव भवति।

(ख) न चैनं सहसाक्रम्य जरा समधिरोहति।

स्थिरीभवति मांसं च व्यायामाभिरतस्य च।। 1×3=3

भावार्थः – व्यायामाभिरतस्य पुरुषस्य मांसं ......। जरा च ......आक्रम्य ......न भवति।

18. अधोलिखित श्लोकयोः अन्वयं पूरयित्वा उत्तरपुस्तिकायां लिखत-

(क) एकेन राजहंसेन या शोभा सरसो भवेत् ।

न सा बकसहस्रेण परितस्तीरवासिना।। ½×3=1½

अन्वयः – एकेन राजहंसेन ......... या शोभा .........। परितः तीरवासिना ......... सा (शोभा) न (भवति)।

(ख) विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम् ।

अश्वश्चेद् धावने वीरः भारस्य वहने खरः।। ½×3=1½

अन्वयः – विचित्रे संसारे खलु....निरर्थकं नास्ति।....चेत् धावने वीरः, भारस्य ...खरः (वीरः)।

19. रेखांकितपदमाधृत्य प्रश्ननिर्माणं कृत्वा उत्तरपुस्तिकायां लिखत– 1×4=4

(क) उद्याने <u>पक्षिणां</u> कलरवं चेतः प्रसादयति।

(ख) <u>अरयः</u> व्यायामिनं न अर्दयन्ति।

(ग) सः <u>भारवेदनया</u> क्रन्दति स्म।

(घ) सर्वे <u>प्रकृतिमातरं</u> प्रणमन्ति।

http://www.ukboardonline.com
http://www.ukboardonline.com



http://www.ukboardonline.com

20. अधोलिखितानि वाक्यानि घटनाक्रमेण संयोज्य पुनः उत्तरपुस्तिकायां लिखत- ½×8=4

(i) क्रुद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारूढः।

(ii) निद्राभङ्गदुःखेन वनराजः सन्नपि तुच्छजीवैः आत्मनः एतादृश्या दुरवस्थया श्रान्तः सर्वजन्तून् दृष्ट्वा पृच्छति।

(iii) एकः सिंहः सुखेन विश्राम्यते तदैव एकः वानरः आगत्य तस्य पुच्छं धुनोति।

(iv) वानराः हसन्ति वृक्षोपरि च विविधाः पक्षिणः अपि सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति।

(v) क्रुद्धः सिंहः इतस्ततः धावति, गर्जति परं किमपि कर्तुमसमर्थः एव तिष्ठति।

(vi) एकः वानरः - यतः त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः। राजा तु रक्षकः भवति। परं भवान् तु भक्षकः।

(vii) तदैव अन्यस्मात् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति एवमेव वानराः वारं वारं सिंहं तुदन्ति ।

(viii) सिंहः - (क्रोधेन गर्जन्) भो! अहं वनराजः किं भयं न जायते? किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा?

21. निम्नांकित शब्दानां संस्कृतेन वाक्यप्रयोगं कुरुत- 1×3=3

(क) सत्वरम्

(ख) कलरवम्

(ग) निर्बलः

*****

**http://www.ukboardonline.com**
**Whatsapp @ 9300930012**
**Send your old paper & get 10/-**
**अपने पुराने पेपर्स भेजे और 10 रुपये पायें,**
**Paytm or Google Pay से**

http://www.ukboardonline.com
http://www.ukboardonline.com
http://www.ukboardonline.com